# सूर्योपनिषत्

ॐ भद्रं कर्णेभिः श्रुणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाग्ंसस्तनूभिः। व्यशेमदेवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥ ॐ शान्तिः शान्तिः शान्तिः

*oṁ bhadraṁ karṇebhiḥ śṛṇuyāma devāḥ| bhadraṁ paśyemākṣabhiryajatrāḥ| sthirairaṅgaituṣṭuvāgṁ sastanūbhiḥ| vyaśema devahitaṁ yadāyuḥ | svasti na indro vṛddhaśravāḥ| svasti na pūṣā viśvavedāḥ| svasti nastārkṣyo ariṣṭanemiḥ| svasti no bṛhaspatirdadhātu| oṁ śāntiḥ śāntiḥ śāntiḥ||*

ॐ अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः। ब्रह्मा ऋषिः। गायत्री छन्दः। आदित्यो देवता। हंसः सोऽहमग्निनारायणयुक्तं बीजम्। हृल्लेखा शक्तिः। वियदादिसर्ग-संयुक्तं कीलकम्। चतुर्विध-पुरुषार्थ सिध्यर्थे विनियोगः।

*om atha sūryātharvāṅgirasaṁ vyākhyāsyāmaḥ| brahmā ṛṣiḥ| gāyatrī chandaḥ| āditpo devatā| haṁsaḥ so'hamagni-nārāyaṇa-yuktaṁ bījam| hṛllekhā śaktiḥ| viyadādisarga-saṁyuktaṁ kīlakam| caturvidhapuruṣārtha siddhyarthe viniyogaḥ|*

षट्स्वरारूढेन बीजेन षडङ्गं रक्ताम्बुज संस्थितं सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाऽभयवरदहस्तं कालचक्रप्रणेतारं श्रीसूर्यनारायणं य एवं वेद स वै ब्राह्मणः ॥

*ṣaṭsvarārūḍhena bījena ṣaḍaṅgaṁ raktāmbuja saṁsthitaṁ saptāśvarathinaṁ hiraṇyavarṇaṁ caturbhujaṁ padmadvayā'bhayavaradahastaṁ kālacakrapraṇetāraṁ śrīsūryanārāyaṇaṁ ya evaṁ veda sa vai brāhmaṇaḥ।*

ॐ भूर्भुवः सुवः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। सूर्य आत्मा जगतस्तस्थुषश्च। सूर्याद्वै खल्विमानि भूतानि जायन्ते। सूर्याद्यज्ञः पर्जन्योऽन्नमात्मा। ४

*oṁ bhūrbhuvaḥ suvaḥ। tatsaviturvareṇyaṁ bhargo devasya dhīmahi। dhiyo yo naḥ pracodayāt। sūrya ātmā jagatastasthuṣaśca। sūryādvai khalvimāni bhūtāni jāyante। sūryādyajñaḥ parjanyo'nnamātmā।*

नमस्ते आदित्य। त्वमेव प्रत्यक्षं कर्म कर्तासि। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं विष्णुरसि। त्वमेव प्रत्यक्षं रुद्रोसि। त्वमेव प्रत्यक्षं ऋगसि। त्वमेव प्रत्यक्षं यजुरसि। त्वमेव प्रत्यक्षं समासि। त्वमेव प्रत्यक्षमथर्वासि। त्वनेव सर्वं छन्दोऽसि। ५

*namaste ādityaǀ tvameva pratyakṣaṁ karma kartāsiǀ tvameva pratyakṣaṁ brahmāsiǀ tvameva pratyakṣaṁ viṣṇurasiǀ tvameva pratyakṣaṁ rudro'siǀ tvameva pratyakṣaṁ ṛgasiǀ tvameva pratyakṣaṁ yajurasiǀ tvameva pratyakṣaṁ sāmāsiǀ tvameva pratyakṣamatharvāsiǀ tvameva sarvaṁ chandosiǀ* **5**

आदित्याद्वायुर्जायते। आदित्याद्भूमिर्जायते। आदित्यादापोजायन्ते। आदित्याज्जोतिर्जायते। आदित्याद् व्योम दिशो जायन्ते। आदित्याद् देवा जायन्ते। आदित्याद्वेदा जायन्ते। ६

*ādityādvāyurjāyateǀ ādityādbhūmirjāyateǀ ādityādāpojāyanteǀ ādityājjyotirjāyateǀ ādityād vyoma diśo jāyanteǀ ādityād devā jāyayanteǀ ādityādvedā jāyanteǀ* **6**

आदित्यो वा एष एतन्मण्डलं तपति। असावादित्यो ब्रह्मा। आदित्योऽन्तःकरण-मनोबुद्धि-चित्ताहंकाराः। आदित्यो वै व्यान-स्समानो-दानोऽपानः प्राणः। आदित्यो वै श्रोत्र-त्वक्-चक्षू-रसन-घ्राणाः। ७

*ādityo vā eṣa etanmaṇḍalaṁ tapati| asāvādityo brahmā| ādityo'ntaḥkaraṇa-manobuddhi-cittāhaṅkārāḥ| ādityo vai vyānassamāno-dāno'pānaḥ prāṇaḥ| ādityo vai śrotra-tvak-cakṣūrasanaghrāṇāḥ| 7*

आदित्यो वै वाक्पाणि-पाद-पायूपस्थाः। आदित्यो वै शब्द-स्पर्श-रूप-रस-गन्धाः। आदित्यो वै वचना-दाना-गमन-विसर्गानन्दाः। आनन्दमयो विज्ञानमयो विज्ञानघन आदित्यः। नमो मित्राय भानवे मृत्योर्मा पाहि। भ्राजिष्णवे विश्ववहेतवे नमः। सूर्याद्भवन्ति भूतानि सूर्येन पालितानि तु। ८

*ādityo vai vākpāṇipādapāyūpasthāḥ| ādityo vai śabda-sparśa-rūpa--rasagandhāḥ| ādityo vai vacanā-dānāgamana visargānandāḥ| ānandamayo vijñānamayo vijñānaghana ādityaḥ| namomitrāya bhānave mṛtyormā pāhi| bhrājiṣṇave viśvahetave namaḥ| sūryādbhavanti bhūtāni sūryenapālitānitu| 8*

सूर्ये लयं प्राप्नुवन्ति यः सूर्यः सोऽहमेव च। चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः। चक्षु-र्धाता दधातु नः। आदित्याय विद्महे सहस्त्रकिरणाय धीमहि। तन्नः सूर्यः प्रचोदयात्। ९

*sūrye layaṁ prāpnuvanti yaḥ sūryaḥ so'hameva ca। cakṣurno devaḥ savitā cakṣurna uta parvataḥ। cakṣu-rdhātā dadhātu naḥ। ātyāya vidmahe sahasrakiraṇāya dhīmahi। tannaḥ sūryaḥ pracodayāt।* 9

सविता पुरस्तात्-सविता पश्चात्तात्-सवितोत्तरात्तात्सविताधरात्तात्-सविता नः सुवतु सर्वतातिगं सविता नो रासतां दीर्घमायुः। ओमित्येकाक्षरं ब्रह्म। घृणिरिति द्वे अक्षरे। सूर्य इत्यक्षरद्वयम्। आदित्य इति त्रीण्यक्षराणि। एतस्यैव सूर्यस्याष्टाक्षरो मनुः॥ १०

*savitā purastāt-savitā paścattāt-savitottarāttāt-savitādharāttāt-savitā naḥ suvatu sarvatātigṁ savitā no rāsatāṁ dīrghamāyuḥ। omityekākṣaraṁ brahmā। ghṛṇiriti dve akṣare। sūrya ityakṣaradvayam। āditya iti trīṇyakṣarāṇi। etasyaiva sūryasyāṣṭākṣaro manuḥ।* 10

यः सदाहरहर्जपति स वै ब्राह्मणो भवति स वै ब्राह्मणो भवति। सूर्याभिमुखो जप्त्वा महाव्याधि भयात्प्रमुच्यते अलक्ष्मीर्नश्यति। अभक्ष्य भक्षनात् पूतो भवति। अगम्यागमनात् पूतो भवति। पतित संभाषणात् पूतोभवति। असत् संभाषणात्पूतो भवति।

*yaḥ sadāharaharjapati sa vai brāhmaṇo bhavati sa vai brāhmaṇo bhavati। । sūryābhimukho japtvā mahāvyādhi bhayātpramucyate। alakṣmīrnaśyati। abhakṣa bhakṣanāt pūto bhavati। agamyāgamanāt pūto bhavati। patita sambhāṣaṇāt pūto bhavati। asat sambhāṣaṇātpūto bhavati।*

मध्याह्ने सूर्याभिमुखः पठेत्। सद्योत्पन्न-पञ्च-महापातकात्-प्रमुच्यते। सैषा सावित्रीं विद्यां न किञ्चिदपि न कस्मै-चित्-प्रशंसयेत्। यः एता महाभागः प्रातः पठति स भाग्यवान् जायते।पशून्विन्दति। वेदार्थं लभते। त्रिकालमेतज्जप्त्वा क्रतुशत-फलमवाप्नोति। हस्तादित्ये जपति स महामृत्युं तरति स महामृत्युं तरति य एवं वेद इत्युपनिषत्। १२ ॐ

*madhyāhne sūryābhimukhaḥ paṭhet। sadyotpanna-pañca-mahāpātakāt-pramucyate। saisā sāvitrīṁ vidyāṁ na kiñcidapi na kasmai-cit-praśaṁsayet। yaḥ etā mahābhāgaḥ prātaḥ paṭhati sa bhāgyavān jāyatepaśūnvindati। vedārthaṁ labhate। trikālametajjaptvā kratuśata-phalamavāpnoti। hastāditye japati sa mahāmṛtyuṁ tarati sa mahāmṛtyuṁ tarati ya evaṁ veda ityupaniṣat।*

शान्तिः शान्तिः शान्तिः ॥

**Peace, peace, peace.**